ISSN: 0474-9030

Vol-67-Issue-8-December-2019

# प्रायश्चित्तविमर्शः

कुलदीप सिंहः

शोधच्छात्रः, धर्मशास्त्रविभागः,

श्रीलालबहादुरशास्त्रीराष्ट्रिय–

संस्कृतविद्यापीठम्, नवदेहली–16

भारतीयधर्मशास्त्रे वैदिकधर्मसूत्रादनन्तरं स्मृतय आगच्छन्ति। स्मृतिशब्दस्य प्रयोगः श्रुतितो भिन्नद्योतनाय विपर्यासद्योतनाय च कृतो वर्तते। श्रुतिद्वारा स्मृतिद्वारा च विहित आचार एव धर्म इति कथ्यते। तदाह वसिष्ठधर्मसूत्रे ''श्रुतिस्मृतिविहितो धर्मः''[1] इति। मुख्यतया स्मृतिकाराः अष्टादश सन्ति, ते च मनुः, बृहस्पतिः, दक्षः, गौतमः, यमः, अंगिरा, योगीश्वरः, प्रचेता, शातातपः, पराशरः, संवर्तः, उशनसः, शंखः, लिखितः, अत्रिः, विष्णुः, आपस्तम्बः, हारित इति।

स्मृतीनां मुख्यविषयाः त्रयः सन्ति आचारः, व्यवहारः, प्रायश्चित्तश्च। तत्र तृतीयस्य प्रायश्चित्तस्य विमर्शोऽस्मिन् निबन्धे विधीयते। प्रायश्चित्ते कामजक्रोधजाज्ञानजपापानां स्वरूपवर्णनं तथा तस्य समाधानार्थं कीदृशः प्रायश्चित्तः कर्तव्य इति वर्णितो वर्तते। सार्वजनिकापराधानां कृते तु राजदण्डस्य व्यवस्था प्राचीनकालादेव आसीत् परन्तु मानसिकपापानां शारीरिकपापानां च कृते प्रायश्चित्तस्य व्यवस्था स्मृतिग्रन्थेषु व्यवस्थितः।

शास्त्रे काम्यनित्यनैमित्तिककर्माणि प्रोक्तानि सन्ति, तत्र काम्यकर्म न क्रियते चेदपि दोषो न भवति, यतो हि तत्तु यदि कामना भवति तदैव क्रियते परन्तु यदि मनुष्येण नित्यनैमित्तिककर्मणी न क्रियेते तदा सः पतितो भवति, तस्य पतनस्य

---

[1] **वसिष्ठधर्मसूत्रम् 1.4.6**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

प्रतीकाराय मनुष्येण प्रायश्चित्तं कर्तव्यं भवति। प्रायश्चित्तपदस्य बहव अर्थाः भवन्ति, तेषु प्रायश्शब्दस्यार्थः पापम्, चित्तस्यार्थो भवति शोधनम् इति, अर्थात् पापानां शोधनमेव प्रायश्चित्तमिति वक्तुं शक्यते। आचार्यबृहस्पतिमते कामकृत्, अकामकृत् इति रूपेण द्वे पापे भवतः। तथैव मनुनाऽपि तथैव प्रतिपादितं वर्तते। यथा –

''अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः।

कामतः कृतेऽप्याहुरेके श्रुतिनिदर्शनात्।।[1]''

तात्पर्यमिदमस्ति यत् अज्ञानवशात्कृतपापस्य शमनं वेदपाठद्वारा भवति परन्तु ज्ञानवशादेव यदि पापानि क्रियन्ते चेत् तदा तु प्रायश्चित्तद्वारैव तेषां नाशः कर्तव्यः। तदाह मनुः –

''अकामतः कृतं पापं वेदाभ्यासेन शुध्यति।

कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः।।[2]''

मनुना निगदितं यत् द्विजाः पूर्वजन्मनः कारणेन अथवा अस्मिन् जन्मनि भाग्यस्य कारणेन यदि किमपि पापं करोति चेत् प्रायश्चित्तस्य भागिनो भवन्ति। प्रायश्चित्तकरणात् प्राक् द्विजेन सुधीजनैः सह सम्पर्कोऽपि न विधेय इति। यथा–

''प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा।

न संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः।।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।

तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्।।[1]''

---

[1] **मनुस्मृतिः 11.45**

[2] **मनुस्मृतिः 11.46**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

यः बालकानां हत्यां करोति, समीचीनकरणे सत्यपि असमीचीनं करोति, यः शरणागतस्य हत्यां करोति, यः स्त्रीणां हत्यां करोति, एतादृशमनुष्येण प्रायश्चित्तविधानं कृतं चेदपि तत्संसर्गे कदापि न स्थेयम्। यदाह मनुः –

''बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः।

शरणागतहन्तृंश्च स्त्रीहन्तृंश्च न संवसेत्।।[2]''

प्रायश्चित्तानां संख्या तु अनेकाः सन्ति। अधुना इतोऽनन्तरं प्रमुखप्रायश्चित्तानां वर्णनं विधीयते –

**अतिकृच्छ्रः** – आचार्यमनोरनुसारं प्रायश्चित्तस्यास्य आचरणं त्रिदिनपर्यन्तं विधीयते। अस्मिन् प्रायश्चित्ते एकस्य ग्रासस्यैव भक्षणं कर्तव्यम्। याचनं विनैव दिनत्रयपर्यन्तं सन्ध्याकाले एकैकग्रासस्य भक्षणं कृत्वा अन्ते पुनः दिनत्रयम् उपवासः कर्तव्यः। यदाह मनुस्मृतौ –

''एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्।

त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरद्विजः।।[3]''

एवमेव याज्ञवल्यस्मृतौ तु एकैकग्रासस्य स्थाने पाणिपूरान्नभोजनस्य व्यवस्था प्रतिपादिता वर्तते। यथा –

''यथाकथंचित् प्राजापत्योऽयमुच्यते।

अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः।।[4]''

---

[1] **मनुस्मृतिः 11.47–48**
[2] **मनुस्मृतिः 11.190**
[3] **मनुस्मृतिः 11.213**
[4] **याज्ञवल्यस्मृतिः 3.319**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

प्रायश्चित्तसारानुसारं मनसो व्यवस्था शक्तजनानां कृते वर्तते। तथैव अशक्तजनानां कृते तु याज्ञवल्क्यस्य व्यवस्था वर्तते[1]।

**अतिसान्तपनम्** – प्रायश्चित्तोऽयं नानाविधप्रकारेण परिभाषितो वर्तते। विष्णोः मतानुसारं प्रायश्चित्तोऽयमष्टादशदिनानि यावत् प्रचलति। आचार्ययाज्ञवल्क्येन महासान्तपनं त्रिगुणितम्, यत्र षड्दिनपर्यन्तं गोमूत्रपानम् एवमन्यपंचवस्तूनाम् आहारः कर्तव्यो भवति। यथा –

''गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।

जग्ध्वा परेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं चरन्।।[2]''

**अर्धकृच्छ्रः** – आपस्तम्बस्मृत्यनुसारेण अस्य प्रायश्चित्तस्याचरणं षड्दिनपर्यन्तं भवति, यत्र एकस्मिन् दिने एकबारम्, एकस्मिन् दिने सन्ध्याकाले, दिनद्वयं याचितभोजनस्य च सेवनं कर्तव्यं भवति। यथा आपस्तम्बस्मृतौ –

''सायं प्रातस्त्वहोरात्रं पादं कृच्छ्रस्य तं विदुः।

सायं प्रातस्तथैवैकं दिनद्वयमयाचितम्।।

दिनद्वयं च नाश्नीयात् कृच्छ्राद्र्धं तद्विधीयते।

प्रायश्चित्तं लघुं ह्येतत्पापेषु तु यथाऽहतः।।[3]''

**अश्वमेधावमृथस्नानम्** – अश्वमेधयागानन्तरं समुद्रेऽथवा पवित्रनद्यां कृत्यस्नानं भवति। अचार्यविष्णुना महापातकानां कृते अनुपातकानां च कृते अश्वमेधस्य व्यवस्था वर्णिता वर्तते। अश्वमेधयागस्तु केवलं सम्राटेन अभिषिक्तराज्ञैव कर्तुं

---

[1] **प्रायश्चित्तसारः पृ.सं. 176**
[2] **याज्ञवल्क्यस्मृतिः 3.314**
[3] **आपस्तम्बस्मृतिः 9.41–42**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

शक्यते, यस्यान्ते विशेषस्नानस्य व्यवस्था वर्तते। प्रायश्चित्तविमर्शस्य मते अश्वमेधयागः केवलं क्षत्रियेणैव कर्तुं शक्यते, आचार्यमनोरनुसारं ब्राह्मणोऽपि अश्वमेधयागस्यान्ते अश्वमेधावमृथस्नाने भागं गृहीत्वा ब्रह्महत्यासदृशमहापातकात् प्रमुच्यते। यथा –

''यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा।

अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा।।

जपन्वान्यतमं वेदं योजनानां शतं व्रजेत्।

ब्रह्महत्यापनोदाय मितभुङ्जियतेन्द्रियः।।[1]''

**कृच्छ्रातिकृच्छ्रः** – कृच्छ्रातिकृच्छ्रप्रायश्चित्ते एकविंशतिदिनपर्यन्तं केवलं जलं पीत्वा स्थातव्यमिति प्रतिपादितं वर्तते। यथा –

''कृच्छ्रातिकृच्छ्रः पयसा दिवानेकविंशतिम्।

द्वादशाहोपवासेन पराकः परिकीर्तितः।।[2]''

मनोरनुसारं तु प्रायश्चित्तस्यास्याचरणं ब्राह्मणहनने सति कर्तव्यं भवति। मारणे सति यदि रक्तस्रवो भवति चेत्कर्तव्यम्। तदाह मनुस्मृतिकारः –

''अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने।

कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम्।।[3]''

**चान्द्रायणम्** – यस्मिन् व्रते चन्द्रमसः प्रचयापचयानुसारेण भोजनं क्रियते तद्व्रतं चान्द्रायणव्रतमिति कथ्यते। यथा –

---

[1] **मनुस्मृतिः 11.74–75**
[2] **याज्ञवल्क्यस्मृतिः 3.320**
[3] **मनुस्मृतिः 11.208**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

''अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन च।
धर्मार्थं यश्चरेदेतश्चन्द्रस्येति सलोकताम्।।[1]''

याज्ञवल्क्यानुसारेण यदा विशिष्टप्रायश्चित्तस्य विधानं कर्तव्यं भवति तदा चान्द्रायणेन शुद्धिः प्राप्तुं शक्यते। व्रतमिदं प्रायश्चित्तस्य कृते नास्ति अपितु शरीरशुद्ध्यर्थम्, आत्मशुद्ध्यर्थं च कर्तुं शक्यते। व्रतस्य आचरणे सति मृत्युप्राप्त्यनन्तरं चन्द्रलोकं गच्छति।

आचार्यमनोरनुसारं व्रतमिदं धर्माय वर्तते, तथैव कृष्णपक्षे ग्रासस्य ह्रासः, शुक्लपक्षे च ग्रासं वर्धनीयं भवति, पूर्णिमायां सर्वाधिकरूपेण पंचदशग्रासाः ग्रहणीयाः। तदाह मनुस्मृतौ –

''एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत्।
उपस्पृशस्त्रिंषवर्णमेतच्चान्द्रायणं स्मृतम्।।
एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमे।
शुक्लपक्षादिनियतश्चरंचान्द्रायणं व्रतम्।।[2]''

**तप्तकृच्छ्रः** – तप्तकृच्छ्रस्य विषये अनेकानि मतानि सन्ति। आचार्यमनोरनुसारं तु प्रतित्र्यहं चतुर्षु अवधिषु व्रतमिदं प्रचलति। प्रथमावधौ दिनत्रयपर्यन्तमूष्णजलम्, द्वितीयावधौ दुग्धम्, तथा तृतीयावधौ घृतम् अन्ते च चतुर्थावधौ पूर्णतया उपवासः कर्तव्य इति। स्वयमेव प्रतिपादयति मनुस्मृतिकारो यथा –

''तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्।
प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः।।[1]''

---

[1] **याज्ञवल्क्यस्मृतिः 3.326**
[2] **मनुस्मृतिः 11.216–217**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

मनुना तत्र श्लोके सकृत्स्नायी इत्यपि प्रतिपादितो वर्तते। तथैव याज्ञवल्क्येन तु चतुर्षु दिनेषु एव सम्पन्नो भवतीति प्रतिपादितम्। तत्र क्रमेणोष्णदुग्धम्, घृतम्, जलम्, अन्ते चोपवासः वर्णितो यथा –

''तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्।
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः।।[2]''

तथा च स्मृतिग्रन्थेषु प्रतिपादितं यत् प्रायश्चित्ताकरणे सति जनाः दुष्परिणामं भजन्ते। याज्ञवल्क्यानुसारं पापकृत्यस्य फलस्वरूपं प्रायश्चित्तं यदि न करोति चेत् परमभयावहं कष्टकारकयातनां च प्राप्नोति। यथा –

''प्रायश्चित्तमकुर्वाणः पापेषु निरता नराः।
अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान्।।[3]''

मनुना प्रतिपादितं यत् यो मनुष्यः दोषाणां पापानां च कृते सम्यक्तया प्रायश्चित्तं न करोति तर्हि सः नरके यातनां प्राप्नोति अथ च पुनरस्मिन् लोके पशुकीटादिषु योनिषु जन्म लभते। यदाह मनुस्मृतिकारः –

''बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात्।
संसारान्प्रतिपद्यन्ते महापातकिनस्त्विमान्।।[4]''

याज्ञवल्क्येनापि एतादृशी व्यवस्था निर्दिष्टा वर्तते यत् नित्यनैमित्तिकादि–विहितकर्मणामकरणे सति तथा सुरापानादिनिषिद्धकार्यकरणे सति तस्य शुद्ध्यर्थं

---

[1] **मनुस्मृतिः 11.214**
[2] **याज्ञवल्क्यस्मृतिः 3.317**
[3] **याज्ञवल्क्यस्मृतिः 3.221**
[4] **मनुस्मृतिः 12.54**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

प्रायश्चित्तमवश्यमेव कर्तव्यम्। तथा सति तस्यान्तरात्मा तथा लोकश्च प्रसन्नो भवति। यथा –

''तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये।

एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति।।[1]''

तदनु च पुनः प्रतिपादितं वर्तते यच्छरणागतस्य बालकस्य, स्त्रीयाश्च हिंसा करणे सति यदि सः प्रायश्चित्तं विधाय दोषहीनो भवति चेदपि तेन सः व्यवहारो न कर्तव्य इति प्रतिपादितो वर्तते। यथा –

''शरणागतबालस्त्रीहिंसकान् संवसेन्न तु।

चीर्णव्रतानपि सन्तः कृतघ्नसहितानिमान्।।[2]''

एतत्तु स्पष्टं वर्तते यत् प्रायश्चित्तं कालस्थानवयसादिपरिस्थित्यनुसारेण भवति। एवमेव वृद्धानां कृते अथ च षोडशवर्षीयाणां बालकानां कृते, स्त्रीणां रोगिणां कृते च अर्धं प्रायश्चित्तम्, तथा उपनयनात् पूर्वं तु बालकानां कृते सपादमेव प्रायश्चित्तं कर्तव्यं भवति। तदाह मिताक्षरटीकायाम् – ''तथाऽनुवनीतस्यापि बालकस्य पादमात्रमेव प्रायश्चित्तम्, स्त्रीणार्धं प्रदातव्यं वृद्धानां रोगिणां तथा। पादो बालेषु दातव्यः सर्वपापेष्वयं विधिः''[3] इति। एवमेव अज्ञानेन कृतस्य पापस्य अपेक्षायां ज्ञानेन कृतस्य पापस्य प्रायश्चित्तं द्विगुणितं भवति। तथैव गृहस्थापेक्षया ब्रह्मचारिणां, वानप्रस्थिनां तथा सन्यासिनां क्रमेण द्विगुणितस्य, त्रिगुणितस्य तथा चतुर्गुणितस्य प्रायश्चित्तस्य विधानं वर्तते। तदैव ते शुद्धाः भवन्ति। यदाह मनुस्मृतिकारः –

---

[1] **याज्ञवल्क्यस्मृतिः 3.220**
[2] **याज्ञवल्क्यस्मृतिः 3.290**
[3] **याज्ञवल्क्यस्मृतिः 3.243 मिताक्षरा टीका**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

''एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्।

त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणम्।।[1]''

तथैव पुनः प्रतिपादितं यत् यदि कस्यचन पापस्य कृते प्रायश्चित्तं प्रतिपादितं नास्ति चेत् तदा अपराधानुसारं तदनुकूलं प्रायश्चित्तं विधातव्यमिति। यथा मनुस्मृतिकारः –

''अनुक्तनिष्कृतीनां तु पापानामनुत्तये।

शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत्।।[2]''

एवमेव पराशरेण प्रतिपादितं वर्तते यत् दशसहस्रगायत्रीजपः सर्वेषां पापानां कृते समीचीनप्रायश्चित्तं भवति। याज्ञवल्क्येन तु गोहत्यासदृशपापानां कृते चान्द्रायणमेकमासपर्यन्तं कर्तव्यं भवति तेनैव तस्माद् विमुच्यते इति प्रतिपादितं वर्तते। यथा याज्ञवल्क्यस्मृतौ –

''उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा।

पयसा वापि मासेन पराके गायता पुनः।।[3]''

विष्णुधर्मोत्तरे उद्घोषितं वर्तते यत् ये जनाः पापं कुर्वन्ति अथ च प्रायश्चित्तं न कुर्वन्ति ते नरकं प्रति गच्छन्ति। तदनन्तरं च नरके दुःखभोगानन्तरं तिर्यग्योनौ जन्म लभन्ते। मनुष्ययोनिं प्राप्नुवन्ति चेदपि शरीरं व्याधिग्रस्तं भवति। यथा –

''प्रायश्चित्तविहीना ये राजाभिश्त्राप्यवासिताः।

नरकं प्रतिपद्यन्ते तिर्यग्योनि तथैव च।।

---

[1] **मनुस्मृतिः 5.137**

[2] **मनुस्मृतिः 11.209**

[3] **याज्ञवल्क्यस्मृतिः 3.265**

ISSN: 0474-9030

Vol-67-Issue-8-December-2019

मनुष्यमपि यासाद्य भवन्तीह तथाङ्गिताः।।[1]''

विष्णुधर्मसूत्रे तु पुनः निगदितं वर्तते यत् नरकयातनानन्तरं पापी मनुष्यः तिर्यग्योनिं प्राप्नोति, तदनु च पापी मनुष्यः मनुष्ययोनिं प्राप्नोति, तत्र च पापस्य लक्षणेन युक्तः सन्नेव तस्य जन्म भवति। यथा – ''अथ नरकाभिभूता दुःखानां तिर्यकत्वमुपवीर्यानां मनुष्ये पापलक्षणानि भवन्ति''[2] इति। तथा च पूर्वोक्तकथनेन ज्ञायते यत् यदि पापं कृत्वा मनुष्यः प्रायश्चित्तं न करोति चेत् मरणानन्तरं नरकं प्रति गच्छति। पुनः मनुष्ययोनिः प्राप्तेऽपि रोगग्रस्तो भवति।

निबन्धस्यास्य सारांशरूपेण वक्तुं शक्यते यत् प्रायश्चित्तं धर्मशास्त्रस्य प्रमुखविषयेषु अन्यतमविषयं वर्तते। यद्यपि लोके दण्डदानार्थं राजानः आसन्, परन्तु राजा तु केवलं देशनियमान् निर्मिमिते यदि जनाः तान् न पालयन्ति तदैव दण्डयति। परन्तु यदि नित्यनैमित्तिककर्मणां त्यागो मनुष्येण क्रियते तर्हि तेन प्रायश्चित्तं तु अवश्यमेव कर्तव्यं भवति। संसारे पापानि ज्ञात्वा, अज्ञात्वा उभयथापि भवन्ति। परन्तु यदि ज्ञात्वा पापानि क्रियन्ते तर्हि तेन प्रायश्चित्तानि अवश्यमेव कर्तव्यानि भवन्ति। अज्ञात्वा क्रियते चेत् अल्पश्रमयुक्तानि प्रायश्चित्तानि कर्तव्यानि भवन्ति। यद्यपि बहूनि प्रायश्चित्तानि तत्र तत्र शास्त्रे उक्तानि सन्ति विशेषदोषपरिहाराय, तथापि यदि प्रायश्चित्तानि नोक्तानि सन्ति चेदपि वेदपाठादिकं कृत्वा पापदोषनिवारणं कर्तुं शक्यते। समग्ररूपेण वक्तुमिदं शक्यते यत् मनुष्यस्य नरकगमनं न भवेत्, तिर्यग्योनौ जन्म न भवेत् एतदर्थमवश्यमेव प्रायश्चित्तं कर्तव्यमेव। एतदर्थं स्मृतिग्रन्थेषु धर्मशास्त्रादिषु च प्रायश्चित्तव्यवस्था आवश्यकी वर्तत इति शम्।

[1] **विष्णुधर्मोत्तरम् 2.73.4–5**

[2] **विष्णुधर्मसूत्रम् 45.1**